रसमारोपोदाहृतः तत्तात्पर्येति यदुक्तं अभिधैव तत्तात्पर्यलक्षणानुमितिर्वा ध्वन्यंतर्भाव
ने शास्त्राभेदेन विशायन्तितेरिति अनुकार्यैरमादिः अनुकर्त्रानटादिः तद्वोचरस्य निरसः ।
प्रतीयते यदुक्तं नानुकार्येपि रामादौ न नटादौ नानुकर्तरि इति अन्यादिति अन्यथास्वप्रसि

ह्ववस्तुसमारोपणम् तदित्थं समासोक्तिं स्वरूपं व्यंग्यत्वप्राप्य पुनरपि सहृदयानां हृदयंगमीक
र्तुं ग्रंथकृदेतत्प्रतीतिविभागेन लक्ष्ये योजयति इहत्वित्यादिना अविमृतिपत्तियोगेन नार्थस्ताव
त्स्फुटः उत लक्ष्यतीति किमस्मानि भिन्नमितिभावः तदा तु गुणप्राधान्येति पारदोनायिकात्वप्रतीतेर्गु
णत्वात् तयोर्विनिरविशेषिणोः कथमिति अप्रकृतनायकानन्तगुणत्वात्सामान्यायोगात् ।
कथमनयत्याव स्येति विशेषणसाम्यायोगात्समासोक्तेरप्रसरे एकदेशविवर्तिन्या उपमाया ।
अप्रकृतत्वात् सामान्यलक्षणेति उपमानोपमेययोस्साधर्म्ये भेदाभेदतुल्यत्वे उपमेति एवमे
कदेशविवर्त्युपमासामर्थ्यादेवात्र नायकत्वप्रतीतिरितिभावः अथेतिपक्षांतरे यदिवात्र
पूर्वोक्तप्रकारेणैवानुगुणप्राधान्यविशेषिणोस्समासोक्तिरूपत्वेन नायकत्वप्रतीतिः तदा ह्यनयेत्त
नामभिमितिविशेषणे कथं साम्येन योजयितुं शक्यमित्याशंक्याह तदत्रेत्यादि एतदेव स्पष्टा ।
न्यानरायप्रसिद्धदृष्टांतमुखेन हृदयंगमीकरोति यथेत्यादिना अग्निहोत्रं जुहुयादित्यनेनो
त्पत्तिविधिवाक्येन हि होमो विहितः न स्वच उत्पन्नविधानमदग्धदहनन्यायेन यावदस्मा ।
मेविधेर्विषयत्वमप्यपगमात्तत्र प्रज्याने इत्येतत्राप्युक्तत्वादुपपरेदग्निसंचार्यत्वेऽत्यर्थः उप

प्र. ले.
वि.
७५
75

मानुप्राणितेति उपमागर्भविशेषणोक्त्यापितेत्यर्थः समासोक्तिरेवेति न पुनरेकदेशविवर्तिनु
पमागर्भत्वेनैतदलंकारान्तरम् यैरिन्दुद्युत्यादिभिः यद्यन्वित्याद्ये ग्रंथस्य पूर्वमेवास्माभिरभिप्रा
य उक्तः सेतत्कूपं वा सामान्यस्य लिंगनाशाद्वस्य स्त्रीत्वमात्राभिधानात् श्लेषवशादिति ।
पयोधराणां हि श्लिष्टत्वे लिंगविशेषे तिरविसंध्ययोः पुंस्त्रीरूपेण कार्यभजनात्वं एवमन्या
लंकारसमयुत्वमपि स्यादर्शयति आकृष्टीत्यादिना सेत्स्यत्तेत्ता एकः कालइति सम
मासोक्तिगर्भे कारीणैवोत्प्रेक्षायाउत्थानात् एवमितियथोक्तगत्येत्यर्थः विशेषणेन्यादि
इहैव समासोक्त्यनन्तरम् विशेषणानां चाग्रवकृत्वमेव विवक्षितमन्यथा हि उपमार्थस्यादो
षत्वाभिधानानिराकरणेन स्वीकृतस्य पुष्टानस्यायं विषयः स्यात् एवमेव विधानेकावि
शेषणोपन्यासद्वारेणैव विच्छित्तिशयः संभवतीत्यस्यालंकारत्वम् प्रतीयमानार्थस्यवा
च्योन्मुखत्वेन प्राधान्याभावाद्गुणीकारस्त्वदंतः कृतत्वम् अत एवेति प्रतीयमानार्थस्यप्रा
धान्याभावात् समासोक्तिर्वैवाच्यस्यैव प्राधान्येन निर्देशात् गंभीरत्वं प्रतीयमानस्याप्यर्थस्य
गुणीभावेन गंभीकारात् यत्र च प्रतीयमानं प्रत्युपसर्जनीकृतस्यार्थयोः पाहार्थयोरवस्था

नेप्रस्तुतप्रसंजनीकृतस्वार्थयोः साम्यार्थयोरवस्थानं संभवतीति विषय इति अत एव नामाप्यस्य यौगिक
मित्याह एवं चेत्यादि सोऽन्याशापरमिति तथाच राज्ञो जगद्दिग्विजयस्य पुनरनन्जमात्रलक्षणा
सिद्धेरन्यदेवनामनमात्रेण राजत्वमित्युपहासपरत्वम् एवमन्येष्वपि स्वयमेवैतदवगंतव्यं
आदिशब्देन यस्यैकस्यैव दोस्तां जयति दशशती सान्द्रयोद्धा विरूढः कारागारेश्वराणामपा
तिरपि च वशाशी च सरथ्यग्रहस्तोकन्यातस्योऽहमेकारजनिचरपतेरेष दूतान्तमेको वालोनिः
शंकमस्याः प्रविशति च नमस्ते जनसे वै स्ववाय इत्यादावपि विशेषणानां प्रस्तुतगंभीरत्वे तेषु
विशेषस्यापीत्यादि इदमिति श्लेषलक्षणम् आद्यमिति प्राकरणिकगतत्वेनाप्राकरणि
कगतत्वेन च एवं कारस्याभिन्नक्रमोद्देशत्वात् तेन प्रकारद्वयमेवेति व्याख्येयम् एतत्तृ
तीयः प्रकारो विशेषणसाम्यप्रभवतीति व्यवच्छेदफलम् अन्यथा हि प्रकारद्वयस्यास्य विशे
ष्यसाम्याभावेऽपि दर्शनादव्याप्तिः स्यात् तथा च संचारपूतानि दिगंतराणि इत्यादि अत्र प्रभा
वेन्दोर्द्वयोः प्रस्तुतयोर्विशेष्ययोः साम्याभावः आबाहुगतमंडलाग्ररुचयः सन्नद्धवक्षःस्थ
लाः सोष्माणो व्रजतो विपक्षहृदयप्रोन्माथिनः कर्कशाः उन्नम्रप्रसवनष्टविग्रहभरा यस्य

अ.से.
वि.
७५
75

स्मरात्रसराघोधावरवशप्लनानाम्रुनन्दधुः कोमंस्तयोवाजितः अप्रकृतयोधयेरप्रकृतयोर्विशेष्य
योः साम्याभावः विशेषणसाम्यमेवेति न पुनर्विशेष्यसाम्ये एतदपि विशेष्यसाम्ये किं न भवती
त्याशंक्याह विशेष्यसाम्येपीत्यादि यथा लेकालक्षाणं अनवतंतमासास्सिलवप्पसराणं प्रा
पीयलोहिश्चाणं वीहेश्चलोपलागाणं अन्नपलासानामिति विशेष्यस्यापि श्लिष्टत्वम् प्रकर
णवशाद्धृतविशेषणाणांमेवावाच्यत्वनियमाभ्यन्तनतेन निश्चावराणां मप्रलमानाद्यौप
त्वम् अत्रचोपमाया एव वाच्यत्वम् उक्तेनातिशयोक्तेरिति प्रकृतानुपयोगादिह नोक्तम् न
नन्वत्र यथैवार्थश्लेषे विषयस्तथैवायमपि भेदद्वयं किं न भवतीति शंकामाशंक्येत्यादिवाच्यत्वा
मिति अत एव न द्वितीये विषयः न स्यवाच्यातिरिक्तस्वरूपत्वात् तृतीयप्रकारविषयत्वेनेति शाधाम्प
द्युक्तमायस्यापि कारद्वयस्य श्लेषयोरुपादानसंभवात् एव इति त्रिविधोपि श्लेषः नत्रेति त्रयनिधी
रणोयत्रेति शब्दश्लेषे अत एवेति तस्त्वादिभेदाभावात् एव इति त्रिविधोपि श्लेषः नत्रेति त्रयनिर्धा
रणोयत्रेति शब्दश्लेषो अत एवेति स्त्वादिभे संकलनयेति सभंगासभंगापदमेलनया द्वयमिति
भेदेन नत्र शब्दश्लेषोयथा नेगस्थितिमत्रापदं भूविपराभूतिः समस्तमुद्यतेनेघानैः समलंकृतं।

निजगलेनैरेवलब्धाद्धितिः तेषां स्थावितदंतिवाजिनिवहास्त्वेभूषितः प्रत्यहं येहस्ताः परमेष्ठि
रेणाभवता कष्टेन कष्टेन वा अन्यपदानां संभंगत्वं स्पष्टम् अर्थश्लेषो यथा इच्छंतौ विष्णुकात्रुं
वनमयोशौ यिल्पशंकोक्तितौ नैविष्ठेन परस्परस्य न मनाकेनापि लंध्यांतसौ धन्यौ मौनरुणी
स्तनाककेनापि विवनयोस्त्वमेपि विश्लेष्यंतो विश्लेषं विषमं विषयस्य भवतो नाथोम्भवौ जातौः
वा अन्यपदानामसंभंगत्वं स्पष्टम् संकलनयान्यग्रंथकृतैवोदाहृतम् नदेवं रूपस्यास्य निर
वकाशां विधीन्वाधंते इति नीत्याति एवकाशत्वात्सर्वालंकारापवादकत्वं केचिदाहुरित्याह
एषचेत्यादिके विदित्युद्भटादयः केचित्तु निर्विषयवैविक्त्यस्य संभवानिरवकाशत्वाभावात्
स्य सर्वालंकारपवादकत्वमभ्युपयंतीत्याह येनेत्यादि अन्य इति माहस्याः विवक्तोऽस्य विष
य इति तुल्ययोगितायाश्च त्राभावात् सा हि द्वयोरपि प्रकृतयोरप्रकृतयोर्वा विशेष्ययोः श्लेष
गुपादाने औपम्यस्य वगम्यत्वे भवति इह तु तदभावः विशेष्ययोः पृथगनुपादानात् औपम्य
स्यावगम्यत्वाभावात् नह्युमामाधवस्यामाधवेन तेन वा तस्य साहश्यं विवक्षितं एकेनैव श
ब्देन श्लिष्टतयार्थद्वयस्य प्रतिपिपादयिषितत्वात् अत्र हि परस्परनैरपेक्ष्यात्तयोरुमाधववा

अलं॰
वि॰
७६
76

क्यार्थपरामर्शो वेलायां समाधवाक्यार्थपरामर्शमात्रमपि नास्तीति को नामौपम्यस्यावसरः
स्मादेवमादावलंकारान्तरविविक्तविषयत्वाच्छ्लिष्टया श्लेषोह्ननरकंपरीभावेन प्रतीतेन निरव
काशः श्लेषः अन्यैः सहसंकर इति द्वयोरपि तुल्यकक्ष्यतया प्रतीतेः वाच्यत्वमिति श्लेषस्य
उज्ज्वलत्वादलंकारान्तराणां च बलवत्त्वात् एतच्च ग्रन्थकृदेवाग्रे दर्शयिष्यतीति नेहायस्त
म् तदेवमस्य सर्वालंकारापवादकत्वेन प्रकृतमन्यालंकारवदेव बाध्यबाधकभावादिद
र्शनात् एतच्चालंकारसाकृतासमपंचमत्कामितीहत्रेषविस्तरभयान्नयानोक्तम् पूर्वेषां
मित्यौद्भटादीनां प्रविशतिपतिस्योतकस्तावच्छ्लेषः व्याप्येति सर्वलक्ष्यव्यापकत्वेन सर्वं
त्रैवास्य विच्छूपत्वात् ननु स इति तुल्ययोगितादीपकोपरि अलंकारान्तराणामित्युपमादी
नां उपमानमिति तुल्ययोगितादीपकाभ्यामपि नस्यातीते रुद्रेकात् अत एवेति अस्याविवि
क्तविषयत्वासंभवात् प्रतिभानमिति प्राभासमात्रं न तु तत्त्वैव विश्रान्तिरित्यर्थः एतच्च
यथानोपपद्यते तथा समनन्तरमेवोक्तम् अस्य च शब्दार्थाश्रितत्वादुभयालंकारत्वं दर्शि
यति अलंकार्यैत्यादिना ननु च यावन्त एव समर्थाः स्युः शब्दास्तावन्त एवहीनाधिकत्वारके

ष्टरत्वमित्यादावपि शब्दद्वयाश्रयाश्लेषालंकार एवायं तत्कथमन्ययोक्तमित्याशंक्याह यद्यपी-
त्यादि एकनालवत्तायामिति रक्तच्छदत्वादेः प्रयत्नादिभेदं विना साहशेषनार्थद्वयाभिधानात् प्र-
तीत्येति शब्दद्वयस्य च्छदद्वयस्य च श्लिष्टत्वात् पूर्वत्रेति रक्तच्छदत्वमित्यादौ शब्दस्य द्वैतस्यानीय-
त्वम् अपरत्रेति नालमित्यादौ जंतुकश्चन्यायेनेति परस्पराश्लेषवलित्वात् पूर्वत्रेति रक्तच्छदत्वमि-
त्यादौ अन्वयव्यतिरेकाभ्यां इति रक्तच्छदत्वमित्येव शब्दश्लिष्टेन श्लेषः शब्दपरिवर्तनेन रक्तच्छेतन-
श्लेषः इत्यत्रापि शब्दद्वैतकत्वात् शब्दालंकारत्वमेवेत्यर्थः शब्दाश्रयाश्रयिभावेनेति नपुनरन्वयव्य-
तिरेकाभ्यां नाभ्यां हि यस्य यदन्वयव्यतिरेकानुसरणं तत्कार्यत्वं स्यात् अपुनरलदलंकारत्वम् लोकवदिति
लोके हि यथा कर्णाश्रितः कुंडलादिरलंकार उच्यते पुनः स्वर्णकार एव तेन कृतत्वात् अलं-
कारः न देवं समनोपोह्यलनायपूर्वमसत्वेन सत्संकरो ऽपूर्वत्वात् वाच्यवाच्यत्वमिति षडंके तदे-
वप्रपंचयति मेनत्कमर्मकेवदमान्यालंकारवाच्यत्वं दर्शयति श्लेषेत्यादिना तृतीयकक्ष्यायामि-
ति प्रथमकंसायां द्विरूपकश्रुतीति रेव द्वितीयकक्षायां तु श्लेषश्रुतीति श्लेषस्य सर्वालंका-
रापवादकत्वमिति कोद्भटप्रभृतेर्यं तदन्यालंकारवाच्यमनेन श्लोकं नतत्ववचनविरुद्धमायमनेना

मितिध्वनितं तदुक्तमेव रूपकसमासोक्तिवाच्यत्वेनस्याग्रहकृतेहृदयंगमितेवाच्यत इति वडवानलसं
हसेत्यादौ बाधिकेति उपोद्बलगेणेत्यादौ एवं श्लेषस्यान्यालंकाराणां च परस्परं बाध्यबाधकभा
भावं प्रकाशयन्नैव सहास्य संकीर्णत्वं दर्शयति इहाविवित्यादिना वडवाग्निमध्यप्रवेशाविवल्ल
भूतसंभवीति विशेषणे लिंगविपरिणामाद्योज्यम् वडवाग्निमध्यप्रवेशप्रतितत्वे प्रतितत्वा
ग्निप्रवेशसंभ्यामिति ब्राह्मणपरिव्याव भाषश्चितात्मकाभ्यां शोषयामिति यत्प्रतितत्वाग्निप्रवे
शयोर्वैलक्षण्यथा स्थितयोरन्ययाभूताभ्यां ताभ्यां समभेदेनाध्यवसायाः न देवकेति सकृद्धे
नानात्क्रियायोगपरामर्शः फलत्वेनेति अपेक्ष्यत इत्यत्राप्यसंबन्धः समस्त्येति हेतुफलयोर्हे
योकत्वेनत्वमानत्वात् ननु विरोधालंकारस्यापि विरोधपरत्वं रूपं न स्पष्टमस्त्येव कृतेन च समाधाने
विरोधप्रकाशतीति विरोधालंकारालंकृतोर्थः कथमकोऽस्य सायाहेतन्तेभनते इत्याशंक्या
ह विरोधेत्यादि यद्यप्यति विरुद्धाभासत्वं विरोध इति स्वतएव च विरोधस्याभासमात्रसारता
प्रथ्याविभासे विश्रान्तिभाव्यानप्ररोहो नापि बाधोत्पत्तावपि पौतिकत्वलत्वंलंभतेमिरिकवे ह
हयाविभासवदत्रिप्रत्ययइतिनात्रपूर्वं विरोधबोधतयाश्चात्र विरोधवीरितिषाकास्यावस्या

दृश्यम् नन्वबाध्यनिषेधपरो नैनेन्देवमिति प्रत्यग्रूपो बाधः बाध्यत्वेनैव प्रतीयते किं तेन कृतं स्यादिति
वेन स्वलक्षणत्वमिति निरूप्यः न यथा हि शुक्तिकारजतमरीचिकासलिलविभ्रान्तिष्विव नात्र प्रथमप्रतीत
प्रतिभातस्याभावबाध्यविज्ञानसमुत्पन्नेन बाधकमदेति बाधोदयेऽपि पैत्तिकत्वलक्षणत्वं भवति मिरि
कत्वं दृश्यावभासस्य विरुद्धप्रतिभासानिह्नतेः केवलमवतद्वशादेवानुपपद्यमानताकारास्व
लक्षणत्वेनैवावगम्यते स्वलक्षणत्वेन प्रतिपन्नव्यवहारं प्रतिनिमित्तत्वानुपपत्तिः न हि पैत्तिकः
स्वपि नद्वैकारात् न्वलत्त्वं भेदर्शनेनमन्यमानस्तत्र दाहपाकाद्यर्थितया प्रवर्ततेतिमिरदोषं वा
जानानस्तैमिरिकोऽपि वहिः शुक्लं दृष्ट्वा शुक्लत्वव्यवहारं विधत्ते एवं बाधोत्पत्तेरनुपपद्यमानत्वात्स्व
लक्षणत्वेन प्रतीयमानो विरोधो न प्रतिपत्त्रपेक्षोऽस्मैन लक्षणव्यवहारनिमित्तभावमुपगन्तु
मर्हति यतोऽनुपपद्यमानत्वेन स्वलक्षणत्वमनुपपद्यमानत्वेव विव्यवहारनिमित्तत्वमिति परस्प
रविप्रतिषिद्धत्वाद्धर्मयोर्विरोधाच्चानयोः कथमेकत्र समावेशो घटते अत एवानेनैवाभिप्रायेण
ह अन्तर्हत्यादिविरोधाभासस्समयपद्धेति नत्त्व बाधोदयसमये स्तम्भः वादोदयानन्तरं विरोधस्याप्य
नाहेतुत्वेन न प्रत्यनेन्यरूपपादितम् स्थितं चोत्स्फुटपाहेतुत्वं विरोधस्येति वादोदयात्प्रागेवानुपपत्त

अ॰वि॰
ल॰
७८
78

पपत्त्या निश्चीयते बाधस्यैव स्वाभाविकत्वं वस्तुतः पर्यालोचनाभावेन हि विरोधस्यापि सर्वत्रोत्त
रकालमेवोल्लासः संभवति न त्वेव बाध्यनिष्ठत्वाद्बाधस्य च शङ्ककालभावित्वात् अन्यथा हि ।
निर्विषयो बाधः स्यात् अत एवोत्तरकाले न विरोधसमाधिरिति भणितेनेतरेऽर्थे मनागनेनायमर्थोऽन्वे
षणीयः यदि हि बाधः प्रागप्युत्प्रेक्षायाः स्वाधिकारवशेन स्वरसत एवोल्लसेत्तदुत्प्रेक्षणीयस्योत्प्रेक्षो
त्थानमेव न स्यादिति बाध्यत एव विरोधस्तदुत्प्रेक्षाया निमित्तमित्युक्तमुत्तरकाले विरोधसमाधि
रिति स च समाधिरत्र दिग्गजयुग्याद्यागमादवगुण्ठनेऽस्ति विरोधस्याश्लेषोऽङ्गम् तद्वशादेवास्योत्था
नात् तथा बाध्यबाधकयोः संकीर्णत्वमात्रमेव न पुनः संकरालंकारः सत्त्वं यथा सज्जातपत्रप्रकारा ।
चिता नितम्ब हंति स्फुटपालनत्वम् विकसमानपर्ककरप्रभावाहिनानि पद्मानि वहन्नहमीशः अत्र
श्लेषवत्स्यैकवाचकानुप्रवेशेन संकरः प्रख्यानां मते पुनरेतन्मत्तिभोत्पत्तिहेतुः श्ले
षोऽयमित्याह श्लेषस्येत्यादि तेनायमेतः स्वाभिप्रायेण ग्रन्थकृता प्रोक्तः यद्वदस्य तेन श्लोकविचा
चारपवं संकरालंकारे प्रत्यग्रमेवं विरोधप्रतिभोत्पत्तिहेतुः श्लेषः दर्शनान्तरेण विरोधस्येषो द्वा
वलंकाराविति न द्वे वेस्वमताभिप्रायेणास्यालंकारान्तरवदन्यालंकारैः सह बाध्यबाधकभावसं

कीर्णत्वेव प्रकाशय शब्दशक्त्युद्भवाद्ध्वनेर्विशेषं प्रतिपादयति यत्रेत्यादिना प्रस्तं बहुत्वाभावादि
ति उपपत्तेः प्रस्तार्थस्य वर्णनीयत्वात् अन्येति श्लेषध्वनिरिति विरुद्धा उक्तनयेनेति अर्थद्वयस्यान्वित
त्वेनाभिधीयमानावच्छमनिष्टेविति अनेन सवथार्थमिति संगत्यर्थम् यथा अतेइ चंद्राभरणस्य
दीपितमन्मथा नावकानरत्नारूपामासानंदं न करोतीति कम् अत्र प्रकृताप्रकृतयोरसम्बद्धार्थ
त्वं मा प्रसांक्षीदिति नायकानिशयोरौपम्यं कल्पनीयं समुद्भूतान्तरेणेति यत्र याहशेन विवक्षिते
न तत्रेति शब्दशक्तिमूले ध्वनौ अनुपपत्तेति औपम्यं विनापि प्रकृताप्रकृतयोः प्रकारान्तरेण सम्बं
धनस्योपपादयितुं शक्यत्वात् उक्त इति काव्यप्रकाशकृता चंद्र इति वर्ण्यमान इति शेषः
सूचितमिति शब्दशक्त्यानामेव विभज्य दर्शं इति तथा चेत्यादिना अत एवेति इत्येवं शब्दशक्तेर्भा
वात् अत्र वयं पुनस्तादिरूपार्थशक्तिरपलीनेव वस्तुध्वनेरूपमयशक्तिमूलत्वमेव तथापि शब्द
शक्तिमूलत्वमस्य ग्रंथकृता अन्यमथानुरोधात्तम् शब्दशक्तिमूलो वस्तुध्वनिर्यथा नमहा
नयेन च भिमर्तिगुणसमतया प्रधानताम् स्वासिकथ इति विरायपृथग्जनतां जगत्पनभिमा
नतांदयत् अत्र केवलयैव शब्दशक्त्या स्पष्टांच्चाशरूपवस्तु भिव्यक्तम् यत्तु काव्यप्रकाशसंकेते

ग्रंथकृताव्यवस्थापनेः शब्दशक्तिमूलत्वं चिंत्यमुक्तं तदुदाहरणाभिप्रायेणैवोन्नेयम् तत्रादिपर्यायेण
ऽस्यास्मत्परमित्यात्मदाहरणमुभयथाशक्तिमूलं शब्दशक्तिमूलस्य व्यवस्थापनेः श्रीमम्मटेनोपात्तम् ।
इहत्वयथासंभवमेव विचारितम् एवं च मतेनास्य ध्वन्यत्वोपपत्तिस्वरूपं प्रत्यपाद्यापि शब्दान्
दोषान्तरमपि न देयमेवमनंतदर्शयितुमाह इह चेत्यादि भूतार्थो वास्तवः संक्षेपः इति प्रमेयसंव
याद् आद्येत्यादि साक्षात्पर्यवसायाप्रकृतरूपा स्वप्रस्तावरति अप्रस्तुतलक्षणेन दाढर्येनेति श्लेषे
दोरित्यादिना द्वितीयेति अप्रकृतपर्यवसायसाक्षात्परूपाप्रदर्शनेनेति शाकुन्तलादावित्यादिना
अत्र ग्रंथकृता श्लेषः सर्वालंकारापवादकइति न केवलं प्राच्यमतानुसारेणैवम् यावदप्रकृत
पर्यवसायसाक्षात्परूपोपपत्ति भेदोपि तन्मतानुसारमेवोक्तः यद्वक्ष्यति व्याजोक्तावन्तरःप्रका
रोविषयेनेरस्यापकर्षोऽदृष्टसिद्धांतानाश्रयेणानन्तमेवोक्तमिति अतस्तत्र ग्रंथकृन्मते वक्ष्यमाणदृश्या
श्लेषमूलाव्याजोक्तिः तस्याएव वाक्यार्थीभूतत्वेन विश्रांतेः उक्तेति समनंतरम् यत्तु समासो ।
क्तिनं तत्रं परिकरश्लेषयोर्वचनं न हि शेषेण सामान्यादिनाप्रसंगागतम् तमेवाह अप्रस्तुतादि ।
त्यादि नन्विहाप्रस्तुतस्यप्रतीतिर्भवती प्राशंक्याह इहेत्यादि तदितिप्रस्तुतवर्णनम् अति

प्रसंगाद्वित्तिसर्वस्मात्सर्वप्रत्यपत्त्यात्मनः तस्यैवेति त्रिविधस्य संबंधस्य समान्यस्य विशेषाश्रय-
त्वाद्धि विशेषवत्सामान्यनिष्ठत्वात्समान्यविशेषयोः परस्परमाधूर्यरणे संबंधः एवं च कार्यस्य कार-
णपरतंत्रत्वादेतस्याव्यस्यकारणस्य कार्येणान्वयव्यतिरेकात् कार्यकारणयोरपि संबंधः इत्थमेतत्सं-
बंधद्वयं वास्तवमस्त्वात्र पेयुनः प्रातीतिकमेव प्रतीतावेव सदृशेन वस्त्वंतरेण सदृशस्य वस्त्वं-
तरस्य प्रतीतिसिद्धेः वस्तुत्वे हि वस्त्वंतरप्रतीत्या वस्त्वंतरप्रतीतिर्न स्यात् अतएव भोगस्येति
कारणात्कार्यस्य कार्याद्वा कारणस्य प्रतीतौ तत्रापीति सत्यपि पंचप्रकारत्वे श्लिष्टशब्दप्रयो-
गइति एवं श्लिष्टशब्दनिबंधनात्प्रशस्तत्प्रशंसा भवतीत्यनुवादाद्विधिः अतएवास्याबहुप्रकार-
त्वमुक्तम् प्रस्तुत इति प्रस्तुतवर्णनस्यैव प्रक्रांतत्वात् अत्र वाक्यांतरोपात्ते विशेषात्मनि
प्रस्तुते प्रस्तुतवर्णनियतिकर्मलक्षणसामान्याभिधानमर्थांतरन्यासइत्येवमन्यत इत्युदाहर-
णांतरेणोदाहियते यथा दुर्जनदूषितमानसं पुंसां स्वजनेपि नास्ति विश्वासः बालः पायसदग्धो
दधिपि फूत्कृत्य भक्षयति अत्र केनापि दुर्जनेन विप्रलब्धस्य कस्यचित्स्वजनविशेषे विश्रंभो नजा-
यते विशेषप्रस्तुते सामान्योक्तिः नेनेति अप्रस्तुतात्कारणात्प्रस्तुतस्य कार्यस्य प्रतीतेः यथावा

अ॰लं॰
वि॰
८॰
80

अनेन सार्धं सरयूवनान्ते कृतजन्मपुरीमपरे विलोक्य विलासवातायनसेवनेन साद्यमयोध्यां
नगरीं विधेहि अत्र स्वयंवरप्रस्तावे कारणे प्रस्तुते कार्यस्याभिधानम् ननु चात्र कार्यात्कारण
स्य प्रतीतौ यदि प्रस्तुतप्रशंसा तदुक्तमानस्य पर्यायोक्तालंकारस्य को विषय इत्याह न
न्वित्यादि स्वयमसिद्ध इति सर्वालंकारकाराभिमते न चैतन्निश्चयनिर्धारणं यदेव वर्णि
तमिति कार्यमेवोक्तं कारणस्य गम्यमानत्वात् न तथेति द्वयोरपि कार्यकारणयो
प्रस्तुतत्वात् स्यादेवेति अप्रस्तुतस्यैव कार्यस्य प्रशंसितत्वात् अतश्च द्वयोरपि प्रस्तुत
त्वे पर्यायोक्तम् प्रस्तुताप्रस्तुतत्वे त्वप्रस्तुतप्रशंसेति विषयविभागः अतश्च सामा
न्यविशेषयोः प्रस्तुतत्वासंभवात्कार्यकारणयोः प्रस्तुतत्वेपि कार्यात्कारणप्रतीति
वत्कारणात्कार्यप्रतीते वैचित्र्याभावाच्च पर्यायोक्ते कार्यहेत्वोर्भेद सामान्ययोस्त
था अप्रस्तुतप्रशंसायां स्वरूपमेव गम्यत इत्यालक्ष्यमपूर्वकम् यदेवं तदत्र पर्यायो
क्ताप्रस्तुतप्रशंसयोः प्रस्तुताप्रस्तुतरूपं कार्यं प्रस्तुतं कारणं कथमाश्रयतीत्या
शंक्याह एवं चेत्यादि नाहश्यमेवेति वाच्यम् स्वोपस्कारकत्वेनेति स्वसिद्धार्थम्

परस्मात्तेषाम् समर्पयतीति वाक्यार्थः इयं च स्वसिद्धये परान्नेपपदार्थे स्वसमर्पणम् ।
उपादानलक्षणं चेत्युक्तालक्षणद्वयाश्रयत्वादनयोरवान्तरोपि विषयभेदोस्तीत्य
वगन्तव्यम् न तन्त्रेति अनयोर्भिन्नविषयत्वात् अन्यरजिकाव्यप्रकाशकारादयः ।
सर्वथेति अनयोर्योः क्रमप्रस्तुतप्रशंसावास्तित्यभिप्रायः इह च साधर्म्येणास्
योदाहरणानां पूर्वमनुदिष्टानामपेतानि साधर्म्योदाहरणानीति नेनातिदेश ।
वाक्येनेति निरस्तम् अयं हि ग्रंथोग्रे ग्रन्थकृतः पश्चात्कैरपि पत्रिकाभिर्लेखनदृत्य ।
सिद्धः तेषामनवधानात् उदाहरणपत्रिकानत्याविना अतिदेशवाक्यं च पत्रिकान्तरा
लिखितमिति ग्रंथस्यासंगतत्वम् वहुनिवुकुरुदाहरणानि साराण्यहेतुकस्य भेद
कस्य लक्ष्ये शाब्दुर्ये दर्शनात्मकम् एवं वाच्यसंभवे उक्तान्येव उदाहरणानीत्यत्राप्यय
मेवाभिप्रायो योज्यः अतश्च परार्थे यः पीडामनुभवति भंगेपि मधुरो यदीयः सर्वेषां

अलं
वि
८८
७१

मिह खलु विकारोप्यभिमतः न संघातिं हि द्वियदि संघशमस्ते त्रपतितः किमिन्द्रं हो वो सो नः
पुनरगुणयामहभुवः तथा पातषु सोभवति महतेनोपनापायय स्मात्कालेना स्तेकः
वनगनायांतियास्यंतिवाल्ये पतावतव्यययति यदालोकवाल्लमोभिस्त्वास्मिन्नेव प्रकृ
तिमहतिव्योम्निलब्धावकाशः तथापतिनिपतितां स्नेहलब्धा निरावरणानमोनगदयि
वंदीगवैनद्धः सम्बद्धरकंधरः निजमगविता स्वास्वा स्वेष्टा विकारशाना कलोयदिनक्र
हनेकाणः काकः करागुकारिष्यति इत्युदाहरणान्यत्रमध्ये लिखितव्यानि येन ग्रंथ
स्यसंगतत्वस्यात् अत्रच समारूपं स्याधर्मे वाच्यसंभवस्यस्फुटापव तदथ्यारोप्येण
ति प्रस्तुतारोप्येणेति एतदिति अत्रचेतनेनेन सह प्रश्नोत्तरकरणम् एतत्तु सामान्या
दिभेदपंचकं वाच्यं सदर्थांतरन्यासदृष्टांतयोर्विषयोभवत्यन्यथा पुनरस्याप्रवेति
दर्शयितुमाह तदत्रेत्यादि सर्वथेति नैतल्लक्षणस्याभिचार उक्तः उक्तन्यायेन

दिनकायनिरूपकशृंगं शृंगाटकाकानि घटनं संभवंति इत्यादौ विषमं न वाच्यमीदृश एव कार्यका
रणभावस्य वलनसंभवात् नसेतित्तायथियितमिदृशस्य श्रुतिलेभयति सिद्धिरिति यावत् श्रुतं ते ।
ति न केवलं तयोः स्वयं विरूपत्वं यावत्तत्संघटनायामननुरूपमित्यत्र तात्पर्यम् एकमित्यादि
भिधेयत्वा यच्छक्तौ विषयाणां भिन्नत्वमुक्तं न प्रकारप्रकारित्वं सामान्यलक्षणस्यासंभवात्
एकमेव घटनं रेखांकस्यादिभिधानमित्याशंक्याह अननुरूपेत्यादि यत्किंचित्तनरसदर्शनविरह
मन्यैरधिकमुक्तं न दिहास्माभिर्यथावस्थं ग्रन्थार्थमात्रव्याख्याननिर्वाहस्तमुत्कमानं त्वात्रति
राकृतमिति ननदेवसिद्धान्तीकार्येन स्पष्टं निरसिष्यमाणत्वात् इहहि यथाशक्तिस्वाकूतमात्र
हृदयङ्गमपरिकीर्यहृष्टणोधानमात्रमेव विवक्षितं यथोपयोगं घटनस्याभिराकरणमपि कृतं कारि
ष्यते च अत्र शुक्लकृष्णत्ववर्णत्वं कार्यकारणात्मकविषयद्वयगतत्वेनाक्षिप्तमित्यस्याभिन्नविषयत्वा
देकविषयाद्विरोधाद्भेदोक्तेयः एवमन्यत्रापि ज्ञेयम् अरम्यात्यादीनामननुरूपमन्योन्यघटनेव्या
लवमित्युदाहरणमित्यथा हरणं न रेणोदाह्रियते यथा शिनीवादशिमहङ्गीकृयमायतलो
चना अयं कचग्रहकुलाग्निकर्कशो मदनानलः अत्रानन्तरूपयोरस्त्री मदनानलयोः संघटनम् ।

अत्रेति नीर्थान्तरे ष्टिन्यादौ आदेति यत्र विषममेवस्यात् नन्वन्यथा दोहदं प्रतिनिषेद्धृदलस्य अत्रा
प्रियतमस्य कटाक्षः समनोदरत्वनस्य विशेषान्तरकः किमपि हेतुं न वक्ष्य अत्र कटाक्षस्य हेतु निषे-
धायोऽदलस्य न केवलेन तदसिद्धिर्यावत्तस्यैवान्यं तं समेऽपि कटाक्षत्वेन यौत्पत्तिः न हि पर्यायर
त्यादि संभवादित्यलंकारत्वस्य अत्र नलेकारत्वादिति कारणात्कार्योत्पत्तेरेवलसाधनोपगतस्य
न सिद्धे स्तु वाल्लवल्लान् यदेवं तत्स्वरूपसंघटनापि वल्लनपयुक्तेति तस्या अपि कथमलंकार
त्वमित्याशंक्याह अत्रैतत्यादि वाननत्वादित्यलंकारत्वपर्यवसायिनः शुभिरूपाशुभिरूपेति शो-
भनाशोभनविषयत्वेनेत्यर्थः अत्र इतिभिरूपविषयः अनुरूप्यादित्यो विन्यलक्षणान् स्ववि
परीतीत्यादि एतदेव व्याचष्टे यस्येत्यादिना यदिति प्रसिद्धम् फलमिति कार्यम् नसेति हेतोः
नदिति कार्यम् अयत्नस्य कार्याहि पिदेऽपि न वैचित्र्यमिति तदिह नोक्तम् एवं यस्य यत्कार्येन स्पता
न हि परोत्तं न भवति यदिव नत्वे स्यात्तनिष्पत्तिर्ये च यदिकस्या विशिष्ययत्नः स्यात्तदयमलंकारस्त
त्रतात्पर्यम् ननु चैतद्विरूपकार्योत्पत्तेः किं न विषममेव भवतीत्याशंक्याह नचायमित्यादि नसेति
विषमस्य नीलयापि पाण्डुयशः प्रसूतमिति विपरीतप्रतीतिवलादेतत्प्रेपयघ्नेतरतिऽव प्रतीतिः

ति अप्रस्तुतप्रशंसाभेदानामेववाच्यत्वकथनात् आहेति सामान्येत्यादिना सम
र्थनार्हस्येति साकांक्षत्वादुपपादनापेक्षत्वात् उपपादनमिति एवमेव एता
दिति नैवांकृत्वादनलक्षणम् कार्यकारणभावाश्रयस्य भेदद्वयस्य काव्यलिं
गत्वं ग्रंथकृदेव वक्ष्यतीति सामान्य विशेषभावाश्रयमेव भेदद्वयमाश्रयणीयं
विशेषेणापि सामान्यसमर्थने यत्र सामान्यवाक्यस्योपपादनापेक्षत्वं तत्राय
मलंकारः नहि विशेषात्मकागस्त्यहृतांतोपादानं विनाऽस्य जलवैलक्ष
ण्यं न चरितमात्रमेव प्रतिष्ठानि भिन्नमिति सामान्यात्माप्रकृतोर्थः सिद्धेत्
यत्र पुनः स्वतः सिद्धस्यैव प्रतीति विषदीकरणार्थं तदेकदेशभूतो विशेष उ

अल॰
वि॰
८२
83

प्रतीयते तद्वोदाहरणालंकारगणसन्निपाते दोषनिमज्जनात्मनः सामान्यस्यैवा

कांत्येण सिद्धसंदोकिरणेषिवांक इति नदेकदेशभूतो विशेषस्तत्र भातीति विवरी

करणार्थमपातः अनश्च विशेषस्यान्येन समर्थनमर्थान्तरन्यासः इत्यत्र विशेषेणापि सा॰

मान्यस्य समर्थनमिति सूत्रणीयम् अन्यथा हि व्याप्तिः स्यात् नस्यैवेति सहसावि

धानभावस्य पतत्कार्यविरुद्धमिति संपद्धरणकार्यविरुद्धम् विरुद्धं सामान्यरूप

तयैतत्तेनानवैधर्म्येन विशेषसामान्येन समर्थितत्वमुक्तम् सामान्येन विशेषेणस

मत्यते यथा असंजातकिणस्कंधः सहते सपि निगोगडी अत्रापि समथ्यसम॰

र्थक

भावसमर्थनाडुदाहरणत्वेन वाच्यम् उदाहृतमिति सहसाविदधीतेत्यादिना एतदुपसंहरा
नन्यदवतारयति एवमित्यादिना तदेवाह गम्यस्यापीत्यादि नकथमेकस्यैवैकस्मिंकाले
गम्यत्वंवाच्यत्वंचसंभवतीत्याह गम्यस्यैवेत्यादि प्रकारान्तरेणेति कार्यादिद्वारेण अतश्च
गम्यस्यैवैकस्मिंकालेगम्यत्ववाच्यत्वासंभवात् कार्यादिद्वारेणेत्यादिशब्दः प्रकारे अभिधी
यमानंहिकार्यंतदविनाभावित्वात्तत्सिद्धयेकारणमाक्षिपतीति गम्यमपितद्वाच्याय
मानमिति यदेवगम्यते तस्यैवभंग्यन्तरेणाभिधानम् अतश्च स्वभ्यलङ्कर्तंयजयस्तनयस्य
दीयः श्यामाबरदत्तजयवाहननामधेयः स्वर्वीरवैरिवरवीरविलासिनीनां स्वभावशोभम
करोत्प्रियदर्शनेयः इत्यादावेवतदलंकारप्रकारत्वेन वाच्यम् वहूथाजयदिति हिक्रियमा
णेगतोस्तमर्कोंभानीङ्करित्यादिवदेतदकाव्यमेवस्यात् नचदोषाभावमात्रमलंकारत्वंयुक्त
मितिवद्धः प्रागुक्तम् यत्तस्वभावविशेषप्रियदर्शनात्मककार्यरूपेणास्यैवनस्वसिद्धयेका
रणरूपस्तद्धयप्राक्षिप्यते तदादितरप्रकारान्तःपातित्वात्स्पष्टमवकल्पनप्रकारमिति निर्बीजे।
वपर्यायोक्तान्तरवाचोयुक्तिः अतएवेतिद्वयोरपिकार्यकारणयोः समवलम्बनात् कार्यमुखे

अलं.
वि.
८४
84

नेति पारिजातमंजरीस्पर्शानन्दावेशेनेत्यर्थः स्वर्गविजय इति कारणरूपः वर्णनीयमिति प्रस्तुतमे
वेत्यर्थः प्राहेति स्तुतिनिंदाभ्यामित्यादिना अप्रमाणान्तरादिति वक्तृवाच्यप्रकरणादिपर्यालो
चनाः बाधितस्तुतिरूपेति आमुखएव अप्रस्तुतवलरूपेत्यर्थः अतएवास्याध्वनेर्भेदः सहि विश्रांते वाक्या
र्थे वाक्तृवाच्यौचितिपर्यालोचनाबलादवगम्यते इह पुनः प्रमाणान्तरबाधितः सन्वाक्या
र्थः स्वयमनुपपद्यमानत्वात् स्तवनिंदादौ स्वं समर्पयति न चैवं प्रकृतवाक्यार्थस्य विश्रांतेः एवं
ग्रहस्तुत्याए स्तोत्रोसह अप्रस्तुते अनवरं निंदाहोरेण हिं प्रसंहि ग्रहे प्रसंवा प्रारलोप्रस्त
रत्यादौ विश्रांते वाक्यार्थे वाक्यवाच्यौचित्यपर्यालोचनबलान्निंदायाः प्रतीतिरिति ध्वनिवि
षयत्वमेव युक्तम् पूर्ववदिति प्रमाणान्तरात् एकाद्वितीया चेत्यभिदधता हृ एवानव्यासस्तु
ती न पुनरेकैव द्विविधा व्याजस्तुतिरिति निरुचितम् प्रकारप्रकारिभावो हि सामान्यलक्षण
सद्भावे भवत्यसंभवतस्तु सामान्यस्यानद्विशेषत्वाभावात् प्राह निबंधनं तु सामान्यमाश्रित्य
द्वयोरप्यभिधानम् एवं स्तुतिनिंदाभ्यामप्रस्तुताभ्यां निंदास्तुत्योः प्रस्तुतयोर्गम्यत्वमित्य
नुसिद्धम् यद्येवं तर्कथमेयमप्रस्तुतप्रशंसैव न भवतीत्याशंक्याह स्तुतीत्यादि न चाहि स्त

मान्यविशेषादीनां गम्यत्वं मतम् विपरीतलक्षणयेति सनिमित्ताद्वाच्याद्वैपरीत्यप्रतीतिरिति भा
वः अन्यथा हि सर्वस्मात्सर्वप्रतिपत्तिः स्यात् लक्षणा च मुख्यार्थबाधपूर्विकैव भवतीत्यभिधीयमा
नायाः स्तुतेर्बाधितत्वस्वरूपत्वमुक्तम् अस्यात्र निंदारूपतो वाच्यत्वे स्तुतिनिंदयोर्यदा गम्यत्वमे
व भवति तदैवालंकारत्वं वनान्यदेति दर्शयितुमाह किं हृतं तैरित्यादि उन्मूलितैरित्युक्तिरेव
वाक्यार्थत्वेनोक्तेत्यर्थः श्लिष्टमित्यनुदाहरणमेवेतदिति तात्पर्यम् अत एवास्य लोचनकारेण
यस्यागमस्यानुदाहरणत्वमुक्तं तदयुक्तमेवेति भावः उररीकृत्यैतत्पक्षमुपन्यस्तमेवाह उक्तवक्ष्य
माणयोरित्यादि तथाविधस्येति वक्रमिष्टस्य अत एव विधानार्हस्येत्युक्तम् स इति निषेधः ।
बाधितत्वस्वरूपत्वादिति प्राकरणिके विधानार्हत्वस्यासंभवात् यद्येवं तर्ह्येतस्यावकाश एवेत्या
शंक्याह तस्येत्यादि अन्यथेति विशेषप्रतिपत्तिर्यदि न स्यात् तस्य च विषयं दर्शयति सचेत्या
दिना उक्तस्येति वक्ष्यमाणत्वकथनरूपस्य आह विनाभिधत्वेनेति सामान्यमुखेनाशौकिमुखेः
न वा अन्यथा हि सर्वत्र विवक्षितार्थस्य निषेधमात्रादेव प्रतीतिप्रसंगः कैमर्थ्यकेति किमर्थ
मेतदिति पर्यनुयोगरूपमित्यर्थः एवमिति कैमर्थ्यपर्यालोचनानयनरूपानुवर्णनरूपत्वात्

अ·सं·
वि·
८५
85

र्वदंतीति प्रत्याः । यदाह भामहः । वक्ष्यमाणोक्तविषयत्वत्राद्योपोहितामतः । प्रकृतमतयाक्षेपो वा निरि-
ष्यते यथाक्रममिति तेनास्माकमेतन्मममतमिति भाव । वक्ष्यमाणविषये हि कथनस्यैव निषेधात्वा-
त्किमर्थमेतत्कथ्यत इति । कैमर्थक्यपर्यालोचनमेव प्रतीयते इत्येकपवाक्ष्येप शाब्दस्यार्थ इति न
स्यार्थभेदाभावाद्वावाच्यप्रपावितिनयुक्तम् । तत्किमेषवाक्षेपो भवन्मते युक्त इत्याशंक्याह नये-
त्यादि । आक्षेपइति विशेषः कार्यकारणयोरभेदोपचारात् । इष्टस्येति विशेषात्मनः । अन्यस्येति वि-
शेषात् । एवं निषेधविशेषयोर्भेदेनावस्थितेनोक्तसामान्यलक्षणसंभवोऽस्तीति तात्पर्यम् । नन्व-
सर्वविशेषाणां सामान्यानुप्राणितत्वादेकत्रापि कृते निषेधे विशेषे परत्रावश्यमेव पर्यवस्यती-
ति कथमत्र निषेधविशेषयोर्भिन्नविषयत्वमुक्तम् । सत्यं यद्यप्येवं तथाप्येतन्नमदर्थमर्थवशेन
तत्र तथात्वावगतेः । इह तु शाब्दमेवैतदाक्षेपाङ्गं नार्थवशायातम् । तथात्वे हि रूपकादीनामपि
उपमानं स्यात्तेषामप्यार्थसादृश्यस्याभावात् । एतच्चोद्भटविचारे राजानकतिलकेनैवा-
स्वरूपं व्युत्क्रममिति न तथास्माभिराविष्कृतम् । नेनेति निषेधविशेषयोरेवभिन्नविषयत्वाना-
देन शब्दस्यार्थभेदात् । यत्त्वत्र विशेषः स किं वाच्यः किं गम्यत इत्याशंक्याह विशेषस्येत्या

रिकथनमेवेति न पुनः साक्षादुक्तं नदिति कथनम् सामान्यप्रतिपत्तयेति सामान्यमेवाश्रुतेत्यर्थः
विशेषनिषेधेनेति सामान्यस्य विशेषाविनाभावित्वात् निषेध्यत इत्यर्थो नत्वत्र च संबंधनीयम्
शेषेणानवगतत्वेनेति सामान्यप्रतिपत्तये त्वत्रापि संबंधः अत्रापि हि परोक्षत्वात् सामान्यमुखेनै
व निषेध्यते विशेषस्य हि साक्षात्त्वनिषेधो न भवति निषेधानंतरं नत्वनीते भोक्षितो निषेधा
संभवात् न एकतो निषेधशास्त्रासमर्पिते तत्कालमप्रतीयमाने च विषये संभवति अपेक्षायास्त
पस्य तु द्वयोर्वा त्वीपयोस्तुल्यत्वाद्विभेदः संभवतीति कथमेकस्यैवोक्तम् इति आशंक्याह शाहेत्या
विप्रकर्षं तमिति तत्र न वर्त्तमानसद्भाव इत्यर्थः वर्तते नो निषेध्यमुखेन विशेष इत्यनेन यस्यैवा
निषेधस्तस्यैव विधिरित्युक्तं निर्वाहितम् स्वयमेवाभेसंमहासिसद्धग्र आलिंगणेऽवणेऽकुरुष्व अ
हवाश्रत्वाद्धि इमिणागमणास्सि विलंबआरेण इत्यत्र पुनस्तत्कस्यालिंगनस्य निषेधो विधितात्प
र्याभावात् निषेधाभासतास्मि यादित्यत उदाहरणं न वाच्यम् यतेत्र विलम्बनकारिणा आलिं
गनमात्रस्यैव चेष्टत्वेन गमनस्य विधिरेव पर्यवसायेन निषेध इति विवक्षितवाक्यार्थविप्रलोपप्र
सात् अतश्चोक्तं विषये विहित निषेधोपपादेयमत्र निषेधोऽन्यत्र विशेषस्येति न वाच्यम् प्रस

ग्र·लं·
वि·
८६
86

इष्टस्येति वक्तनः तद्भूयामिति तत्कथनस्यैव निषेधः सामान्यद्वारेणेति भणिष्यामीति भङ्ग्या न सामान्य
मात्रितेत्यर्थः तत्र उत्तरदपराद्वोदाहरणे यथा मीवेति तस्य विशेषाभूतवक्तव्यम् इष्टस्येति काकादिन्या
येन योज्यम् अंशेणाक्ता विति सर्वे तु देतमित्यादिना अंशांतरस्येति नियत इत्यादेः किमप्यवाहतत्न
ल्पितेनेति सामान्यरूपस्यैव निषेधः एवमप्यस्य विभज्य स्वरूपं प्रतिपादयति एवं चेत्यादिना
उपयुज्यत इति एतत्सूत्रलक्षणमंतरेणाक्षेपएव न भवतीत्यर्थः तदेवाह नेनेत्यादि निषेधविधि
तोद्देश इति संबंधः एतदुत्तरत्रापि योज्यम् यदाहुः विहितस्य निषेधेन न निषेधविधौ भवेत्
निषेधेन विधिर्यत्र तत्राक्षेपः प्रकीर्तितः इति तत्र निषेधविधिर्यथा एवत्नोरोधजन्माऽमुद
जलपतिः स्वेयमाकाशगंगाश्रालेशीर्षे तदेतत्तदिदमनिमित्तं नेत्रमग्रे रगारम् सैषाहाला
हलश्रीर्वलयितनतवो नागराजाः स्वपतेकं कालंकालिकारेरिदमपितदलंभाषितैरोनमले
प्रत्रालमिति निषेधस्यैव विधिः अत एव तस्याभासत्वम् तदभावाश्च न विधिपर्यवसानम्
इत्याक्षेपोपयोगित्याः स्वामप्याप्रभावइति नायमत्रालंकार साहित्यलक्षणतिधावेव भवति
विहितनिषेधस्तु यथा अलमथः शिवमस्तु वस्तवितते किं विहयेत्रमहेहेसंतः शृण्वताव।

यत्र च भूतो गुणास्ते सेवांजलिः यद्वा किं विनयोक्तिभिर्मम मानिनीयं यद्गलितस्तत्कामस्तं मार्गय निः
स्वयमेव तत्त्वमनसो याचनापरे दैन्यमूः अत्र विहितानां विनयोक्तीनां निषेध इति विहितनिषे
धः पूर्वं वस्त्वाचनात्क्षेपालंकारः निषेधेन विधिस्तत्र ग्रंथकृता वोदाहृतः अत्र च निषेधस्य स्वयमनुप
पद्यमानत्वात् विश्रान्त्यमानत्वात् नात्मानं विध्यर्थी समर्पयतीति परार्थे स्वसमर्पणमन्येवं रूपलक्ष
णं मूलत्वमस्ति सिद्धम् यदुक्तमन्यत्र यत्र स्वयमविश्रान्ते परार्थे स्वसमर्पणम् उक्तते सास
आक्षेपो निषेधस्यैवभासनात् इति निषेधविधौ विहितनिषेधे च प्रश्नरभिधेयनिषेधः न पुनः
स्वसिद्धये पराक्षेप इत्येवं लक्षणं मूलत्वमत्र वाच्यम् मुख्यार्थस्यैव विश्रान्ते मुख्यार्थबाधाद्य
भावात् अतश्चान्यैः स्वसिद्धये पराक्षेपप्रतिषेधस्य यत्राहि आक्षेपस्तत्रैनैव मूः प्रतिषेधस्याभा
सनादित्याद्युक्तमेवोक्तम् यद्यपि लक्षणायां स्वसिद्धये पराक्षेपस्यानागभावप्रसंगः
तथापि तत्सत्त्वाश्रयेऽपि प्राच्यानामपर्यालोचिताभिधानमिति एवं परमेतदुक्तम् ननु च यद्ये
वं निषेधस्यासत्यत्वाद्विधिपर्यवसाने आक्षेप उक्तस्तद्वद्विधेर्निषेधपर्यवसाने कोनामा
लंकार इत्याशंक्याह विधिनेत्यादि अस्येत्याक्षेपस्य शब्दसाम्यान्निषेधनं सामान्यविशेषभा

अ.लं.
वि.
८०
87

वमाश्रित्य वाच्यप्रकारस्य प्रकारविभावः कल्पितो न त्वत्राल्पत्वे विधिनिषेधयोर्निषेध विधानाद्गुरुकत्वाद्वा ।
योस्सामान्यलक्षणायोगात् ननन्वेति निषेधस्य विधिपर्यवसानात् अस्य दालंकारान्तराद्वैलक्षण्या ।
ण्यदर्शयन्ति केवलमित्यादिना अत्र राज्यवर्धनोक्तौ बालत्वादेकत्वम् श्रीहर्षदेवोक्तौ निषेधावि
वक्षाप्रधानेति न केवलं बाल्यावत्वनिषेधनेनाविवक्षितत्वात् वक्ष्यत इति सोक्तार्थेण कार्यवि
रुद्धक्रियात्वेत्यादिना प्रत्यवसानार्थत्वयापि द्वीकृत्यापि प्रतिपादयति न दिष्टस्येत्यादिना अ
न्यकृत्य इति विशेषार्थम् अस्य च यथा विधिरूपत्वेन न प्रतीतिः तथा निषेधरूपत्वेन सोक्तार्थे
एवं च निषेधकत्वादाक्षेपोक्तेर्न निर्बन्धनमिति विहितनिषेधाद्यवेत्यमानविधेयस्य त्वात् इत्यनि ।
त्यादि नस्येत्याक्षेपस्य तद्भावमात्रेण निकेवले नैवच्चमत्कारस्सद्भावेनेत्यर्थः प्रतीयत इति ग
म्यते नाहंगणिकेति निषेधस्यानेदानुपात्तत्वात् विशेषमात्रस्य गम्यत्वे प्याक्षेपालंकारो वाच्य
एव निषेधाभासस्यापि गम्यत्वे धन्य इत्यनेन दर्शितं अन्यथा त्वस्य तु न्यमानमोदाहरणम
युक्तमस्यात् नस्येदानुपक्रान्तत्वात् इत्थं वा निषेधाभावस्यैव गम्यत्वे अयं धन्यमानो भवति ।
न निषेधमात्रस्यैवेति दर्शयितुमाह नत्वित्यादि अतश्च उनिकृतायदेत द्वाक्षेपादावथा ॥

गे नतु स्वक्रमेवेति भावः एवं चास्य यथोपपादितं स्वरूपमुपसंहारभंगत्वापि प्रतिपादयति सर्वे
षेत्यादिना सर्वथेत्यनेन क्वचाप्यस्याबाध्यत्वाभावो नास्तीति दर्शितम् एतदुपसंहरन् अन्यदवतारय
ति एवमित्यादिना समानन्यायत्वादिति यथात्रेष्टस्य निषेधो बाधितत्वाद्विधौ पर्यवस्यति तथै
वैवेष्टाप्यनिष्टस्य विधिर्निषेधे इत्येवं रूपात् एवमेतन्मात्रमस्यादिस्यबात्तेपस्य सामान्येन
ष्टेन सामान्यलक्षणसद्भाव इत्यर्थः तदेवाह प्रतिषेत्यादि एतदेव दृष्टान्तद्वारकं व्याचष्टे
यथेत्यादिना तदिति विधानम् प्रसक्तलक्षणत्वादिति स्वार्थबाधात् पर्यवस्यतीति स्वात्म
समर्पणेन निषेधं लक्षयतीत्यर्थः ननु श्रुति विधेर्निषेधलक्षणात् उपकरणीभूत इति ।
स्वार्थबाधादुपसर्जनीभूत इत्यर्थः अनिष्टविशेषेत्यनेन प्रयोगमनमत्रोक्तम् अन्यथा हिग
मस्नानतुल्यत्वं स्यात् निषेधापूरणादिति निषेधस्यात्र लक्ष्यमाणत्वात् सर्वत्रैव हि लक्षण
यां लाक्षणिकेनैव लक्ष्यार्थः प्रापूर्यते तस्मात्तत्प्राप्तिपक्षे: मन्त्रार्थानवापूरणं स्वस्तित्वस्येपरा ।
क्षेप इत्येवं लक्षणप्रकारस्य पूर्वं निरस्तत्वात्स्वात्मसमर्पणेनैव भवतीति यथोक्तमेवयु ।
क्तम् अत एवास्यानुष्ठाभियत्वम् पर्यन्तयोगावदापरणमपि विलोतेपशाहृस्यार्थः व्याख्या ।

स्तुत्याशैवनव्याने नञ्लत्ते र्किंवत्तनत्वान्नत्वनत्वमेवच युक्तेनाक्षेपत्वाम् । इह हि प्रधानेन व्यपदेशा भवंतीति ।
न्यायादिदेवयज्ञप्रधानयाविवक्ष्यते न देवतव्यपदेशनिमित्तमूनवप्रस्तातिशायवनां प्रस्तावलक्षनिष्ठ
त्वांतिन तत्सामयिके पुनाविति नीत्यानाक्षि विवादोपक्रमः तस्मादाक्षिप्यते विधिना नयतो नि
षेधः स्वार्थविधावपि न पर्यन्तयोगवृद्धिः तस्मान्निह विधिरेव विलक्षणत्वान्नाक्षेपमर्थापत्तिरे
पित्तभिन्नएवेत्यादि निवाच्यम् निराकरणमुखेनेति प्रवृत्तक्रियत्वात्कांतस्यानुमोदनहारेणेत्य
र्थः पलुटरूपत्वेनेति स्वार्थबाधात् शाश्वयतीति स्वात्मसमर्पणेन ननु विधिमुखेनास्य किमा
पूरणं स्वयानिषेधयपवक्रियतामित्याशंक्याह फलमित्यादि एतस्येति विधेर्निषेधार्थ रकत्वम् यथा
षेधनेनास्यालक्ष्यमानुपूर्व्यं दर्शितम् प्रवृत्तएवेति न पुनः पर्यवसाने इत्यर्थः एतदेवोपसंहरतितस्मा
दित्यादिना ग्रभिनवत्वेनेति दृष्टादिपेतया तेनएसोहत्याशीर्वदनाक्षेपो यदाशीर्वादवत्मेनास्वा
वस्थां सूचयत्येवं प्रिययाज्ञातिनिषिध्यते यस्यकेरसंभवतापि लक्षणेन लक्षितः ननु गन्थ्ययुक्तं डपस्
त्वेनैतव्याख्येयम् विधिनिषेधाभ्यां प्रतिषेधविधि किसाहीप इनी हगीवर्णितं श्रीभोजदेवेनाप्यस्यल
क्षणं कृतम् २१ इदानीं विरोधस्यलक्षणमुपक्रमते आक्षेप इत्यादिना एतत्त्व्याख्यावेनेति विकृतत्वा ।

त्रप्रवेशात्तद्गुणेनेत्यर्थः। न ह्यासीति विरोधगर्भालंकारोपक्रमेऽपीत्यर्थः। नावदित्युपक्रमे न त्वादि विरुद्धग
र्भत्वस्य प्राधान्येन तमेवाह विरुद्धेत्यादि तन्मध्यपवेति जात्यादीनां गुणद्रव्यपव विजातीया गुणक्री
नामपि जात्यादयः एव विजातीया व्याख्यातानुगुणरवेयत्तद्ध्याख्यादय इत्यर्थः। ननु विरोधस्य दोषत्वं वा
च्यं शब्दनास्य कथमलंकारत्वमुच्यते इत्याशंक्याह सर्वत्रेत्यादि समाधानपरिनिवर्तत्वमनपर्यालो
चनाल्लभ्यो विरोधप्रतीतिं तत्तरभावे नैनदेवमिति मनस्यपरूपो बाधः प्रमुखपवेति न पुनः पर्यवा
साने नेनाक्षत्वावगतो विरोधः पर्यवसाने न तथात्वप्रतीरोहमीनीति भावः। एतत्त्रैलेष एव वितन
प्रत्यपादितमितेरूनपुनरावतलम्। एवं वस्त्वपि समादाने दोषाभावमात्रमेव स्यात्तद्रूपं नाशंक
नीयम् अलंकारपर्यवसायिनो विच्छित्तिविशेषस्यापि संभवात्। एतेर्गुणेन सह विरोधे उक्ते वि
रोधोऽन्योन्यबाधकमिति दृष्टान्ते नैव गुणस्यापि जात्या सह विरोधः सिद्धिश्च न एव गुणस्य जातिवले
नयोर्भेदः एवमन्यत्रापि ज्ञेयम्। हिमात्रेणेति श्रुते नैषां लक्षणतया वै विष्याभावादनवकाशमिव निना
श्रुतेर्प्रवाक्यमाभिरप्येने नोदाहृताः। अन्यादिनश्रुनेनेह विरोधनैरन्तर्यकाश्रपि वै विज्ञारायिनो भेदाश्च
भतेतव्याः इत्यपि दर्शितम्। तेन भावयोरभावयोर्भावाभावयोश्च विरुद्धतापनिवंधे विरोधो ज्ञेय इति

अ·ल·
वि·
८९
89

तत्र भावयोर्ग्रंथकृतैवोदाहृतम् अभावयोस्तु यथा नेवोत्पवीयक्रमितेस्तरसांगयाशिशिरेवपवपद
मुहूर्तमदहंती मार्गाचलविचित्रकरांजलितेवसिंधुः शैलादिरागततनयानययोनतस्थौ अत्राभाव
रूपयोः क्रिययोर्विरोधः भावाभावयोस्तु यथा अनंगलेखायोगराजवर्णने विदर्भांगनाजनमविद
र्भगर्भकरमकरोत्स्वचनांजनयन्नपि पंचालस्यैवमृत्युम् उल्लाल्यापारमीकरणमपयपारसीकरणे
चकार भागदानपिविभागयांचकार यथाशौलकांतानपश्चोत्कांतां समपादयत् ऊंतलालसानकुं
तलाल्लसांश्च निर्ममेशूरसेनानपशूरसेनानदर्शयदित्यादि अस्याभिमतभेदेन श्लेषेणसहव्यव
स्थितिं दर्शयन्नमाह विविक्तेत्यादि जडपतिवनांपंचकुरुते इत्यत्रास्य विविक्तविषयत्वम् दर्शनां
तरइतिग्रंथकृदभिमते संकरशब्दश्चात्र संकीर्णत्वमात्रे वर्तते तेनात्र संकरीण संकीर्णत्वेन श्लेष
मिश्रत्वेनालंकारो विरोधाभास इति व्याख्येयम् अलंकारशब्देनवात्र विरोधाभास एवाभिधीयते
तस्यैवेह प्रस्तुतत्वात् अत्रहि श्लेषो विरोधोत्थितौ हेतुत्वं भजते तेन विना तस्यानुत्थानात् संकरश्च
स्वहेतुवलाल्लब्धसत्ताकयोरलंकारयोर्भवति तेन यो यस्य हेतुतां भजते तेन सह तस्य संकरो न यु
क्तः यदुक्तं तेन च विरोधोत्पत्तिहेतौ श्लेषश्लेषस्य विरोधेन सहांगांगिसंकर इति द्वयोरेकस्येति।

तेन श्लेषमिश्रत्वस्यापि वैचित्र्यं दर्शितं अस्य वक्ष्यमाणाद्विरोधगर्भादलंकारवर्गाद्भेदं लक्ष्यएवं दर्शयति
पक्वेत्यादिना जडीकरणतापकरणयोर्विकारगतत्वेनास्यैकविषयत्वम् विषयभेद इति कार्य-
कारणादीनामनेकविषयत्वोपपत्तावपि भिन्नदेशत्वरूपनिर्वंधात् तावदिति प्रथमम् कारणाभावे
कार्योत्पत्तेरसंभवं तेन विरुद्धत्वात् अत्राहेति कारणाभाव इत्यादिना तत्र तावत्कार्यस्य कारणपरतंत्रि-
ताम् दर्शयति रहेत्यादिना यदुक्तम् यो हि येन विना नास्ति यस्मिंश्च सति विक्रया तदेव कारणं तस
नान्यत्कारणमुच्यत इति अन्यथेति यदि कारणं विनाप्यकार्यस्य संभवउपनिबध्यते इत्यर्थः ननु य-
थेवं तत्कथं कारणाभावे कार्योत्पत्तिरूपा विभावना भवतीत्याशंक्याह यदित्यत्यादि तथाभाव इति
कारणाभावे कार्योत्पत्तिः अत एव कार्यस्य विशिष्टत्वम् सेति यथा भंगया कारणं विनापि कार्यमेव
ध उपनिबध्यत इत्यर्थः विशिष्टेति प्रसिद्धम् विरोधपरिहार इति अप्रसिद्धस्य कारणांतरस्याश्रयत्वेन
त्वात् यद्येवं तत्कथमियं विरोधप्रवणं भवतीत्याशंक्याह कारणेत्यादि नेनेति कार्येण यदुक्तं कार-
णस्य निषेधे न बाध्यमानः फलोदयः विभावनायामाभाति विरोधोन्योन्यबाधनम् अतो हरेविरो-
धोस्या विभेदेन व्यवस्थित इति एतत्स्वप्रसंगाद्विशेषोक्तेराह एवमित्यादि लेखककल्पितस्त्वायमप

अ॰ लं॰
वि॰
९॰
90

पादः तथापि हरतापिनत्रयस्यैवौवल्लाहरणेनकार्यभावेनतन्तुहरणरूपंकारणेनवाध्यते अपितुस्या
स्यापितन्तुहरणाख्येसामग्र्येकदेशेनवलेऽनन्तमितिकार्याभावस्यैववाध्यत्वेनप्रतीतिः तस्मादेवंविशेषो
क्तौकारणस्यतयाकार्याभावस्यैववाधितत्वेनप्रतीतिः तस्मादेवंविशेषोक्तौकारणस्यतयाकार्याभा
वस्यैववाध्यमानत्वमन्त्रैयमितिपाठोयुक्तः एतदेवराजानकतिलकेनाप्युक्तंकारणसामग्र्यमदि
वाधकत्वेनैवप्रतीयतेकार्यानुत्पत्तिस्तुवाध्यत्वेनेति यं यंकृत्वा पाय स्तन्मानानुवर्तत्वेव तदुक्तमस्मा
त्न्यायेऽस्माभिः प्राधान्यलक्षितः येनेतिएवमस्यैववाध्यत्वेनप्रतीतिः ननुच क्रियायाःप्रतिषेधेयत्फल
स्यविभावनातथाविभावनेत्यादिनोद्भटादिभिरेतल्लक्षणेक्रियायाग्रहणंकृतमितिकथमिहतदुक्ते
नेनकारणग्रहणंकृतमित्याशंक्याह इहेत्यादि सर्वैरितिवोधादिभिः अतरतिवैयाकरणैरेवक्रिया
फलस्यकार्यस्याभ्युपगमात सामान्येनेति सर्ववादिसाधारणत्वेनेत्यर्थः सर्ववादिसाधारणेयौदि
ग्रेथः द्वितीयेरति मन्यपादयोन्नविभावनेतिभावः यौवनहेतुकत्वेनेतिसमाधानायापसिद्धंकार
णमाश्रितेत्यर्थः मन्यथाहिविरोधपरिहारोनस्यात् ननुवासवजनितोन्यएवमदोयौवनहेतुकश्चा
न्यएवेत्यत्रयौवनहेतुकएवविवक्षितइतिकथंकारणाभावेकार्यस्योत्पत्तिरित्याशंक्याहमदस्ये

न्यादि द्वैविध्यमिति दृष्टान्तदर्पणरूपे सति निशयोक्तिः अविविवादास्पदीति अतिशयोक्तं विना अस्यायुक्त
न्यानात् अत एवेयमतिशयोक्त्यानुप्राणितैव भवतीति सिद्धं नदेवाह नदनुप्राणितत्वेनेति
यदुक्तमन्यत्रापि अत्राह्लिष्टाति शयोक्तिस्तु सर्वत्रैव विभानेति निरुपादानसंभारमभित्तावेव तन्
तेजगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने इत्यत्र नत्वजगत उपादानादिविरहेणैव भगवत्कार्यं
स्य वास्तवत्वाद्विभावनैव नास्तीति कस्मान्निशयोक्त्यनुप्राणितत्वं स्यात् एवं एतदर्थेण अवश्यंही
एणअव्यलेन अवश्यमानविस्मानं एतेनात्रह विकासविकोविग्रणोवलहेद्दोर इत्यादावपि तेयमत्र
नस्यक्वचिद्गुरुत्वस्यापि संभवात् सर्वत्रास्या अतिशयोक्त्यनुप्राणितत्वमिति नवाच्यमिति यदुक्तं
तद्युक्तम् विशेषोक्तिवदिति विशेषोक्तौ शाब्दोऽर्थयोर्मिलापार्थः अत्रवादितदाहरणे द्वितीयपा
दएव विभावनाया आख्येया तत्रानन्येर्यत्रोक्तमित्याह अलंमहत्यामित्यादिके विशितिविवदंतर
तिसंबंधः अकारणत्वादिति संभरणादिहीनं डनादेस्वरूपम् यद्येवं तत्र तत्रान्यः कोऽलंकार इति
शंकामाह एवेत्यादि अन्येऽपि निवाममनीयाः अपरे रसोद्भवाः त्वनीयस्वपत्तोनथास्तोलेखकपरिक
ल्पितत्वात् तथास्यारोप्यमानस्य प्रकृते उपयोग इति तस्यालक्तितत्वात् संभवोपयोगयोस्तु नैकत्वं

ग्र॰ लं॰
वि॰
८८
91

भिन्नत्वात् ग्रंथकृतापि स्याद्वादमीमांसायामेतच्छ्लोकविवृतावुपन्यस्तमेवोक्तम् लेखकेनाप्यग्रंथस्य
प्रतिपदमेव विपर्यासः कृतः तथा चावैवासंभूतमित्यादिको ग्रंथस्खलदः ऽप्राणितत्वेनेत्यस्य पश्चा
दुपपन्नोऽपि गम्यमानमित्यस्य पश्चाल्लिखितः एतच्च न तथा हृदयं उदाहरणमित्यस्माभिर्यथास्थित एव ग्रं
थो व्याख्यातः नहि पर्ययेति कारणसमग्र्यौ कार्यानुत्पादात् तामेवाह कारणेत्यादि समग्रा
णीति नाथ सर्वकारणानि कार्यवंति भवंतीत्याय समग्राणीत्युक्तः कार्यजनकत्वं न स्यादि
तिभावः श्रुतएवाव्यभिचारायाह नियमेनेति अन्यथेति यदाकारणानि कार्यं नोत्पादयंति
एवं नैकं किंचन जनकं सामग्र्येव जनिकेति नेत्यासमग्राणां कारणानां कार्यजनकत्वं भवत्येवे
तितात्पर्यार्थः यदा तेन हि पर्ययेन तथा निवध्येत न तदा विरोधः किं भवतीत्याह यत्वित्यादि अत्रवस्तु
नो निमित्तमस्तीति विरोधपरिहारः तत्तेनक्रमेणास्याभेदनिर्देशमाह सा चेत्यादि अचिंत्येति उक्ता
नाशयैर्वस्तुनस्तु संभवत्येव अन्यथा यस्मादविरोधोऽयं परिहारः स्यात् अविकल इति समग्रे वि
रुद्धधर्मसंसर्गस्य शक्यता विरोधात् अस्मात्तु कार्यान्वयान्ते विच्छिन्नत्वंतरेणवं यदर्शयत्तमाह का
र्येत्यादि कथाकन्तूरइवेत्यासैव मिति यथैव तत्र कार्यानुत्पत्तिविरुद्धमुखेनोपनिवध्यते रत्न

तथा च सतीति द्वयोरपि विनयोर्विरुद्धत्वेन कार्यकारणभावोपनिबंधे सतीत्यर्थः उक्तं दायाः

करणे कौमारहरवराद्यसन्निधानं तस्य विरुद्धं तत्सन्निधानं तेन कौमारहरवनाद्यसन्निधानस्वरूप

कारणं विनापि उत्कंठाया उत्पाद इति विभावना उत्कौमारहरवरादिसन्निधानरूपस्य कारणस्य का

रणमनुत्कंठा तस्याश्च विरुद्धोत्कंठा तेन सत्यपि कौमारहरवरादिसन्निधानरूपे कारणे समर्थे का

र्यस्यानुत्कंठारूपस्याभाव इति विशेषोक्तिः ग्रस्तस्त्वमिति कार्यकारणयोस्तादात्म्यनिबंधनेना

प्रतीतेः ननु चात्रानयोः किमिति संदेह एकपदाश्रय एव क्रियतामित्याशंक्याह साधकेत्यादि न

नु हन्तं हितामत्रुरुषस्यासिंहासनं राज्यमित्यादावेवमनेनया विशेषोक्तिरुत्सेह किं नोच्यत इत्या

शंक्याह यात्वित्यादि एवमनयैव रसैकगुणहान्युपचयादिकल्पनाया सामंदर्भ्यं विशेषर

तिलत्वितो विशेषालंकारोप्यस्मिंदर्शितेनैकमेदमेवेति न पृथग्वाच्यः प्रस्तावेणानुगुण्येन

प्रतएवेयं ततः कार्यकारणभावाश्रयाविशिष्टत्रि विशेषाः संभवंतीति प्रपंचमात्रं दर्शयितुं उन्नरि

ह्रासस्य वचनं एतस्स्वार्थं यत्कृतैवोक्तम् प्रकारपंचकमध्ये कार्यकारणभावेन यः प्रकारः स कार्यका

रणताश्रयालंकारप्रस्तावे प्रपंचार्थं लक्षयिष्यते इति उच्यते इति न उन्नतिर्णीयते पूर्वत्रैवास्या

अलं॰
वि॰
९२

र्गीतत्वात् तामेवाह कार्यकारणयोरित्यादि उभयत्रापि नियतशब्दः पुनर्व्यभिचारदर्शनार्थ
म् एतद्रूपापगम इति कार्यकारणयोः साम्यविपर्यासाभ्यामुपनिबंधात् प्रौढोक्तिनिर्दिन इति
कीर्तिश्रुयोर्वस्तुतो निर्गमनप्रवेशासंभवात् प्रतिपादित इति प्रयोजनत्वात् तयोरित्यादि एत
देव व्यतिरेकमुखेनापि दर्शयति न हीत्यादिना उचितसंगतिनिहितेरिति एकदेशयोरपि कार्य।
कारणयोर्भिन्नदेशत्वेनोपनिबंधात् अत एव तयोर्भिन्नदेशत्वादियं विशेषभेदेन भवतीत्येक
विषयाद्विरोधादस्या भेदः इह लक्षितत इति अस्याश्चापि कार्यकारणयोर्भिन्नदेशत्वेन विरोधगर्भ
त्वात् अभेदाध्यवसायात्मनेनातिशयोक्तिरस्याः अस्याश्च पूर्वप्राणकत्वेन कदाचिन्ना अन्यथा।
हि विरोधोज्जृम्भितं स्यात् एवं परस्परभाषयोरतिशयोक्तिबलात्मजापालनयुक्तेः संतापवा
चकत्वमदृश्यताम् अन्यथेति कारणत्वारो विरूपेत्यादि इहेति अस्याश्चापि तद्रूपसंसर्गेण विरो
धगर्भत्वात् विरूपमिति कारणापौलया विघटितेनेतेनानुरूपत्वात् यद्यपि गोमयादूहि कोऽत्र
ति रितिवत् कार्यकारणयोर्वास्तवं विरूपत्वं संभवति तथापीह कविप्रतिभानिर्वर्तितमेवैत
द्बोध्यं तेन ज्वालाकलापनिशितखे भूयिष्ठलोलश्यामापी पूरसारस्ससनिर्भरगर्भवति विषमद्रष्टव्यक

ष्यथेतिनिषेधबलादेवप्रतीत्यप्रतीतेः यद्यपिबिम्बमेवहिरूपस्यकार्यंतस्यस्वयमेवोत्पादितिविरुद्धवन्निष्पन्नये
प्यत्वयतिस्थितेनोपमयोःस्फुटोभेदस्तथापिग्रंथकृतानाविशेषपरिहारायैवसूत्रेऽत्रैकागम्योभेदो
गम्यगमकः मोचनस्याग्रहणेस्वंफलम्ग्रहणेपुनःकथंभवतीत्याशङ्क्यपुनरोद्दितमेवेनाह निषेधप्र
तीतिः अनेनतरंचतन्निमित्तादेवप्रतीत्यप्रतीतिः अतएवबिम्बमात्रस्यभेदः स्फुटान्तरंतिष्ठत्येकपु
स्यैवावगतत्वात् पुनरुदाहरणमस्यलक्ष्यप्राचुर्यदर्शनार्थम् एतद्धिग्रन्थकृतैवाभिनवत्वेनो
क्तम् आश्रयेत्यादि इहेतिविविधानंतरम् ननुनवरूपयोःसंघटनेबिम्बमनुपलम्भितस्याश्रयाश्रयि
णोस्तत्वेकथमलंकारांतरत्वमुच्यतेइत्याशंकागर्भीकारीणैनत्वेवाबलो नत्वेत्यादिना आश्रय
स्येत्याधारस्य आश्रितस्येत्यादेयस्य अनेनैवचासभेदद्वयमनुक्तम् एवंचपरिमितत्वापरिमि
तत्वापरिमितित्वयोःसापेक्षत्वात्तयाविधवस्तुद्वयसंघटनेनैवतत्त्ववगमसिद्धिरित्याधाराधे
ययोःसंघटनयैवानन्तरूपत्वमवगम्यते बिम्बमेवानन्यापेक्षत्वेनस्वतएवानन्तरूपयोःसंघटनमि
त्यनयोर्महान्भेदःइत्यत्रपिण्डार्थःइत्यमाधाराधेययोर्यत्रसंसर्गःस्यादिरूपयोःसर्वस्तोबिम्बमोवा
विमध्यकेनाधिकंतत्तदनित्यवाच्यम् तस्याश्रयाश्रयिणोःकाचित्प्रतिभाकल्पितमेवग्राह्यम् नपुनः

अलं॰
वि॰
५२
93

वेत्त्वं तेन वा रूढा प्रतीतेः तेन न भसोत्पत्तेरप्रतीतानां वान्योन्यापेक्षया वैशिष्ट्यं पारिमितं स्ववत्त्वमेवे-
त्यनुदाहरणमेतत् तदुदाहरणं तु रमन्येषां ननु यथा रणरणकसूचितादित्र स्तनन्तरणस्मिता राईस्त
ह्वरहरास्मिमेरुगुरुवक्षःस्थलत्रजैरद्रिप्रपकरूएरदार श्रीकरुदयस्य महत्त्वं तन्मा स्वतन्त्रमित्याधाराधे-
ययोरन्योन्यरूपम् परस्परमित्यादि ननु यदि परस्परजननस्य विरुद्धत्वेन तत्कथमस्यालंकारत्वमि-
त्याशंक्याह क्रियेत्यादि क्रियाशब्देनात्र धर्मो लक्ष्यते अन्यथा प्रकाशः कोपि कैलासशैलस्य एवं
द्वितीययोः अविद्यायतनत्वान्योन्यपदत्वजननक्रमादित्यादौ गुणात्मकपदत्वजननेन परस्परजनने
पृथ्व्यामितःस्यात् परस्परोत्पादकत्वमिति परस्परनिष्पादकत्वमित्यर्थः एवं चानेन जननस्य क्रि-
यासामान्यात्मककरणार्थत्वं दर्शितम् तेन श्रियं नमत्युदयं विशेषतन्त्री परयुवतिः प्रसाराप्रसा-
रणया श्रुतिस्तभगतनयाहरंत माम्यायविचरिति जैल्दयन्येवेशयतमित्यत्र परस्परं एदयान्तरवे-
शात्माभ्यां कृतनरतिप्रतीतेः पर्यवसानपरस्परजननस्याव्यापकत्वेन वाच्यम् विपर्ययं शर्वक-
याक्तुनस्य चालक्यभूपालस्य रस्तुकार पपायसप्रष्टुनिवराहलेविद्रूलांगं वस्वभावभारेत्यत्र
पुनरादिवराहहननं तेन वैलक्षण्यमात्रस्य विवक्षितत्वादन्योन्यालंकारएव नास्तीति कश्चिद्व्या

एकत्वमवस्यात् एवमन्यत्रापि ज्ञेयम् नच्यान्वोक्तिविरोधादिति इत्येतत्तात्पर्यदोषलक्षणत्वेन परिहृ
तत्त्वविरोधसमाधिर्भवेत्तदलंकारत्वमपि स्यादिति भावः यथा धनेन जायते प्रज्ञा प्रज्ञया जाय
ते धनम् प्रज्ञार्थी जीवलोकेऽस्मिन्परस्परनिबंधनम् अत्र प्रज्ञाधनयोः स्वरूपस्य परस्परं जननम् दे
शकालभेदाद्विरोधसमाधिः शोभाक्रियेति सैव तत्र परस्परनिमित्तम् अन्नावारमित्यादि एत
देव व्याचष्टे इहेत्यादिनाऽपरिहारेणेति आधारव्यतिरेकेणेत्यर्थः परिमितमितव्यापकम् व्या
पकस्य हि युगपदनेकत्र स्थितिर्विरुद्धसंभविनीति न तत्रालंकारत्वम् किंचिदिति यत्र यादृग्वि-
वक्षितं न केवलेन केवलमारब्धस्य वस्तुनो निष्पत्ति यावदसंभाव्यस्यापि वस्त्वंतरस्य तत्र तात्प
र्यार्थः न च स्ववक्तान्तरं चिकीर्तितं भवत्यचिकीर्षितं वा एवं च फलान्तरस्य निष्पत्तिश्चिकीर्षा विर
होऽपि यास्य विशेषश्चिकीर्षायोगसंगलनतः पृथगित्याह कथन्नुत्याप्रसंगादित्यादिः प्रसंग इति
प्रसंगात्त्वमलंकारान्तरम् न वाच्यम् न हि चिकीर्षितत्वमचिकीर्षितत्वं वा कश्चिद्विशिष्टेति वि-
शेषो येनालंकारान्तरत्वं स्यात् यावताऽत्रासंभाव्यस्य वस्त्वंतरस्य निष्पत्तिर्विवक्षिता सा चात्रास्ति
नेति किं चिकीर्षितत्वाचिकीर्षितत्वकल्पनेन तस्मादंगे शुभांगि हारिचंदनपंकचर्चामालोलहा

रवलयादिवर्यंष्टिवधाः । योऽभूरिवापतिवियोगविषाददंभोऽन्योन्याभिमानपरिकर्मसमग्रकुमारीदित्यत्र हरि
वेदनवचोदिना न केवलं पतिवियोगविषाददंभः कृतो यावद्विस्तारपरिकर्मापि कृत इति शाक्यव
स्तेनरकरणात्मैवायं विशेषः । विशेषाख्यायत्रयोन पुनरेकस्यैव विधोल्लक्षणस्याभिमन्यमानत्वात् तदितस्य
त्वविशिष्टत्वस्याभावाद्रत्नेषामपि विशेषत्वम् । गिरामप्रकविस्थभावादन्यत्रभावः । शंभोस्तु लोकोत्तर
वस्तुसंपादनेन्द्रानन्वमेवेति विशेषमन्यान्यमन्यन्ते एतावतैव पुनरस्याभावो वाच्यः । उदाहरणमेतरे
ष्टुस्य संभवात् तानि त्वयथा शृङ्गाणि वेदनरसाद्विपरीततानि वेदनपर्यन्तमतिवाङ्कुरयं हृषीकैः वाल
किशोरतिलककुवलयसैन्येष्वोऽपरिलापदरुः प्रतापः शृङ्गाराणां नाम न हन्ते नाथा रत्नाभावेप्य
धेयस्य प्रतापस्याधितिरिति विशेषालंकारत्वं यथा च दोरिश्वरमणउलिपद्भितिपिदुंहे विदिशमिति किं तु
जैव श्वेतीमहीजोण्हुभरेहि तिमिरं पिवोसि । हि सिसुत्र न केवलं प्रियं हरिद्धासियावंसिकीमा विरहेणासं
भाव्यंतिमिरमपीनिवत्यंते नरकरणात्मा विशेषः यथा वा माघ शशुपालवधे विधर्के विवधमदे विधदे रत्ना
करः स्वविजये हरविजयं वर्णयन्नाहृष्ट न प्रवनं केवलं माघः शिशुपालवधं चकार यावदसंभाव्यं विकीर्षि
तेकविवदमरपीत्यसाक्यवलंतरकरणात्मायं विशेषः प्रशाक्यमेवकविदमदंकतैर्माघस्यात्रकर्तृत्वम् । प

वगुणस्याप्यत्रेयं अत एकस्मिं क्रियमाणेन जातीयस्य शक्तेर्गतत्वसिद्धेः रत्नेगतस्तन्तुबंगात्लंकारोपि विशेषप्रवांतर्भ
वतीति न पृथग्वाच्यः यथा सादित्तमेस्मारि निदर्शनादितामिति ननु निदर्शनादर्शितं तेभाव्यमानेन हिहितीयव्याघातः
विषयः ननु इति निदर्शनादनन्तर्थः तन्त्र निर्दिष्टं हि नेति निदर्शनादितवलक्ष्याह लिकाणितां तं नेनैवेतस्य भारः अन्यत्रादि वै
विद्यातिशयोनस्यात् अन्यथा कियतेरतितन्त्रप्रमेदैकवस्तेन रजननेनेमर्थः अत एव नामाप्यस्य योगिकमिन्याह
निदर्शनादिनेन्याहि अत उपचारनिदर्शनस्य वस्तुनोनन्याहरति रूपनिबध्यतेन च नायमलंकारो निदर्शनेते वस्तुरोहाद्या
नयोगात् निदर्शनवलक्ष्याह इति निर्दिष्टव्याघातः पालेचाश्रयाह इति कारिणालक्षैलक्षण्यम् अत एवोत्त्यानिविनाशयोरो
केणायनेव्याघात इत्यनलक्षणीयं एवं हि व्याघातन्नमेवन स्यात् गत्वमममालिने भड्ग्मुनिर्मतिः यतनिस्मालिनो
भोजवलमलेस्फीतालत्मीः प्रथममवेदिनम् भक्तनिस्वभागाहेतेभावाश्रमेभ्रियं जनेनोद्धजतिस्मतनरोदर्पराजेत
एवमत्रोत्कर्षाः इत्यत्र चकुलादयो यथानेकोदर्पहेतवोननयाननप्रस्तुतविनयकारिणः इत्येवंविवधगुणविशि
ष्टेभ्यः शरुषांतरेभ्यो स्वैवैलक्षण्यमात्रं विवक्षितं न तत्कुलादिभिरूपादितोपि दर्पस्तव्याहत इति येन व्याघाता
लंकारो भवति अथ चाद्दर्पकारिणोपि कुलादेर्लद्धिनाशस्य पमत्लंकार इति चेन्नेनतत्कुलादीनां प्रकृतिभेदे न द
